यस्य दर्शनम् । प्रविश्य हेमाद्रिगुहागृहान्तरं निनाय बिभ्यद्दिवसानि कौशिकः” माघः । इन्द्रस्य कुशिकपुत्रत्व-प्राप्तिकथा “कुशिकस्तु तपस्तेपे पुत्रमिन्द्रसमप्रभम् । लभेयमिति तं शक्रस्त्रासादभ्येत्य जज्ञिवान् । स गाधि-रभवद्राजा मघवान् कौशिकः स्वयम्” हरिवं० १अ० । “कुशिकस्तु तपस्तेपे” इत्युपक्रम्य “अत्युग्रतपसं दृष्ट्वा सहस्राक्षः पुरन्दरः । समर्थं पुत्रजनने स्वमेवांशमवासयत् । पुत्रत्वे कल्पयामास स देवेन्द्रः सुरोत्तमः । स गाधिर-भवद्राजा मघवान् कौशिकः स्वयम्” हरिवं० २७अ० । कुशैस्तत्त्वाद्वा कौशिकत्वमस्य यथाह तत्रैव “जातमात्रस्तु भगवानदित्यां स(शक्रः)कुशैर्वृतः । तदा प्रभृति देवेशः कौशिकत्वमुपागतः” हरि० २२७अ० । २गुग्गुलौ ४व्यालग्राहिणि (सापुड़े) अमरः । ६नकुले ७कोषाध्यक्षे मेदि० । ८कोषकारे शब्दरत्ना० ९शृङ्गार-रसे त्रिका० १०मज्जनि हेम० ११अश्वकर्णवृक्षे राज-नि० । कुशिकस्य गोत्रापत्यम् विदा० अञ् । १२विश्वा-मित्रमुनौ स हि कुशिकपुत्रस्य गाधेरपत्यम् । कुशि-कशब्दे तन्मूलं दृश्यम् । “अपिबच्च ततः सोममिन्द्रेण सह कौशिकः” भा० आ० १७५अ० ।

१३पौरववंश्ये नृपभेदे । “परीक्षितस्य द्वौ पुत्रौ” इत्युप-क्रमे “प्रतिष्ठायाश्च द्वौ पुत्रौ पैप्पलादिश्च कौशिकः” हरिव २९१अ० । जरासन्धनृपस्य हंसनामके १४सेनापतिभेदे “स तु(जरासन्धः)सेनापती ! राजा सस्मार भरतर्षभ !। कौ-शिकं चित्रसेनञ्च तस्मिन् युद्ध उपस्थिते । ययोस्ते नामनी राजन् हंसेति डिम्बकेति च” भा० स० २१अ० । तस्य च कौशिकवंश्यत्वात् तथात्वम् । १५असुरभेदे “खङ्गमः शा-लवदनः करालः कौशिकः शरः” हरिव० ४२अ० । कुशिकवंशोद्भवत्वात् १६नदीभेदे स्त्री तस्या उत्पत्तिकथा रामा० आ० ३४अ० “कुशवंशप्रसूतोऽस्मि कौशिको रघुनन्दन ! । पूर्व्वजा भ-गिनी चापि मम राघव ! सुव्रता । नाम्ना सत्यवती नाम ऋचीके प्रतिपादिता । सशरीरा गता स्वर्गं भर्त्तार-मनुवर्त्तिनी । कौशिकी परमोदारा प्रवृत्ता च महानदी । दिव्यपुण्योदका रम्या हिमवन्तमुपाश्रिता । लोकस्य हितकार्य्यार्थं प्रवृत्ता भगिनी मम । ततोऽहं हिम-वत्पार्श्वे वसामि नियतः सुखम् । भगिन्यां स्नेहसं-युक्तः कौशिक्यां रघुनन्दन ! । सा तु सत्यवती पुण्या सत्ये धर्म्मे प्रतिष्ठिता । पतिव्रता महाभागा कौशिकी सरितां वरा” “तत्र मासं वसेद्वीर ! कौशिक्यां भरतर्षभ ! । अश्वमे-धस्य यत् पुण्यं तन्मासेनाधिगच्छति” भा० व० ८१अ० । “कुशि-कस्याश्रमं गच्छेत् सर्व्वपापप्रमोचनम् । कौशिकीं तत्र गच्छेत महापापप्रणाशिनीम् । राजसूयस्य यज्ञस्य फलं प्राप्नोति मानवः” तत्रैवाध्याये । “इयञ्च नदी हिमवतः निःसृता चम्पानगरसन्निकृष्टे उत्तरपारे गङ्गायां सङ्गता । “ततो गच्छेत राजेन्द्र ! चम्पकारण्यमुत्तमम्” ततइत्युक्ते-स्तस्यास्तत्सन्निकृष्टत्वम् । १८यशोदाकन्यात्वेनोत्पन्नायां योगमायायाम् । कौशिकेन्द्रेण भगिनीत्वेन कल्प-नेन विष्णुना तस्यास्तन्नामकरणात्तथात्वं यथोक्तम् “तत्र त्वां शतदृक् शक्रोमत्प्रदिष्टेन कर्म्मणा । अभिषेकेण दिव्येन दैवतैः सह योक्ष्यसे । तत्रैव त्वां भगिन्यर्थे ग्रहीष्यति स वासवः । कुशिकस्य तु गोत्रेण कौशिकी त्वं भविष्यसि” हरिव० ५८अ० योगमायां प्रति विष्णूक्तिः । “आर्य्या कात्यायनी देवी कौशिकी ब्रह्मचारिणी” भा० हरि० ५९अ० । पार्व्वत्याः शरीरकोश(षा)न्निःसृते १९दे-वीमूर्त्तिभेदे तस्य च मूर्त्त्यन्यमध्यतापीति भेदः तन्मूलं देवीमाहात्म्यवाक्यं तच्च कोशशब्दे दर्शितं नाट्ये २०वृत्ति-भेदे अलङ्कारशब्दे लक्षणादिकं दृश्यम् [ तथात्वम्

**कौशिकप्रिय** पु० ६त० । श्रीरामे विश्वामित्रप्रियाचरणात्तस्य

**कौशिकफल** कौशिक कोशस्य फलमस्य । नारिकेले शब्दरा०

**कौशिका** स्त्री कोशएव स्वार्थे क अतइत्त्वम् । पानपात्रे चषके हेम० [ शब्दमाला १विश्वामित्रपुत्रे च

**कौशिकात्मज** पु० ६त० । १इन्द्रपुत्रे जयन्ते २अर्ज्जुने च

**कौशिकायनि** पु० कुशिकस्यापत्यम् बा० फिञ् । यजुर्वेद-वंशब्राह्मणस्थे ऋषिभेदे “कौशिकायनेः कौशिकायनिः” शत० ब्रा० १४।५।५।२१

**कौशिकायुध** न० ६त० । इन्द्रचापे शरत्ना०

**कौशिकाराति** पु० ६त० । १काके राजनि० तस्य पेचकारातित्वं च तेन सह नित्यविरोधित्वात् । तत्कथा काकोलू-कशब्दे दृश्या कौशिकारिप्रभृतयोऽप्यत्र पु०

**कौशिकिन्** पु० ब० व० कौशिकेन प्रोक्तमधीयते णिनि । विश्वामित्रप्रोक्ताध्यायिषु

**कौशिक्योज** पु० कौशिक्या इव ओजोयस्य पृषो० सलोपः । शाखोटवृक्षे (सेओड़ा) राजनि०